Roll No. ........................... Total Printed Pages - 4

# F-3402

## B. A. (Classics) (Part-I) Examination, 2022

**(Compulsory)**

**Paper First**

**साहित्यम्**

*Time : Three Hours]* *[Maximum Marks:75*

**सूचना- सर्वे प्रश्नाः समाधेयाः।**

1. अधोलिखितेषु केचिद् द्वे पद्ये व्याख्येताम्- 20

(क) परिहरतु भवान् नृपापवादं,
न परुषमाश्रमवासिषु प्रयोज्यम्।
नगरपरिभवान् विमोक्तुमेते,
वनमभिगम्य मनस्विनो वसन्ति।।





(ख) अनाहारे तुल्यः प्रततरुदितक्षामवदनः,
शरीरे संस्कारं नृपतिसमदुःखं परिवहन्।
दिवा वा रात्रौ वा परिचरति यत्नैर्नरपति,
नृपः प्राणान् सद्यस्त्यजति यदि तस्याप्युपरमः।।

(ग) कामेनोज्जयनीं गते मयि तदा कामप्यवस्थां गते,
दृष्टवा स्वैरमवन्तिराजतनयां पञ्चेषवः पतिताः।
तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धावयं
पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः।।

(घ) भारतानां कुले जातो विनीतो ज्ञानवाञ्छुचिः।
तन्नार्हसि बलाद्धर्तुं राजधर्मस्य देशिकः।।

2. अधोलिखितस्य एकस्य परिचयोदेयः 10

(क) यौगन्धरायणः

(ख) विदूषकः

3. (i) कस्यचिदेकस्य पद्यखण्डस्य प्रसंगानुसारिणी व्याख्या कार्याः। 10

(क) स्वामी द्वेष्टि सुसेवितोऽपि सहसा प्रोज्झन्ति सद्बान्धवा,
राजन्ते न गुणास्त्यजन्ति तनुजाः स्फारी भवन्त्यापदः।
भार्या साधु सुवंशजापि भजते नो यन्ति मित्राणि च,
न्यायारोपित विक्रमाण्यपि नृणां, येषां न हि स्याद्धनम् ।।

(ख) अपरीक्ष्य न कर्तव्यं, कर्तव्यं सुपरीक्षितम्।

पश्चाद्भवति सन्तापो ब्राह्मण्यां नकुलार्थतः।।

(ii) कस्यचिदेकस्य गद्यखण्डस्य प्रसंगानुसारिणी व्याख्याकार्या 10

(क) अस्ति दक्षिणात्ये जनपदे पाटलिपुत्रं नाम नगरम्। तत्र मणिभद्रो नाम श्रेष्ठी प्रतिवसतिस्म। तस्य च धर्मार्थकाममोक्ष कर्माणि कुर्वतो विधिवशात् धनक्षयः सञ्जातः। ततो विभवक्षयात् अपमान परम्परया परं विषादं गतः।

(ख) ''वयं सर्वविद्यापारे गताः। तदुपाध्यायम् उत्कलापयित्वा स्वदेशे गच्छामः।'' ''तथैव क्रियतां'' इत्युक्त्वा ब्राह्मणा उपाध्यायं उत्कला पयित्वा अनुज्ञां लब्ध्वा पुस्तकानि नीत्वा प्रचलिताः। यावत् किञ्चित् मार्ग यान्ति तावत् द्वौ पन्थानौ समायातौ। उपविष्टाः सर्वे। तत्रैकः प्रोवाच-केन मार्गेण गच्छामः'' एतस्मिन् समये तस्मिन् पथे कश्चित् वणिकपुत्रो मृतः तस्य दाहार्थे-महाजनो गतोऽभूत। ततः चतुर्णां मध्यात् एकेन पुस्तकं अवलोकितम् - ''महाजनो येन गतः स पन्थाः'' इति तत् महाजन मार्गे गच्छामः।

4. ''अपरीक्ष्य न कर्तव्यं'' इत्युक्तिः चरितार्थाः। 10

**अथवा**

मणिभद्रो नाम श्रेष्ठीः कथा लिखत।





5. केषाञ्ति **त्रयाणां** परिचयो देयः- 15

(क) वासवदत्ता

(ख) दशकुमारचरितम्

(ग) शिशुपालवधम्

(घ) नैषधीयचरितम्

(ङ) रघुवंशम्

(च) सौंदरानंदम्